दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

himsanskritvartah
e-Sanskritnewspaper
नवा प्रेरणा नवोत्साहः

■ पृष्ठ-3 ■ वर्ष-3 ■ अङ्क-286

1 08.08.2024 गुरुवासरः वि.सं. २०८० श्रावणशुक्ल चतुर्थी श्रावण 24 प्रविष्ठांशः

Website- www.himsanskritam.com Email-himsanskrit@gmail.com

## पैरिस-ओलिम्पिक्-क्रीडायां मल्लयुद्धे विनेश् फोगाट्-इत्यस्याः अयोग्यतायाः विरुद्धं विरोध-प्रत्यावेदनम् प्रस्तुतम्- क्रीडामन्त्री मनसुखमाण्डविया

**हिमसंस्कृतवार्ताः।** क्रीडामन्त्री मनसुख् माण्डविया अवदत् यत् भारतीय-ओलिम्पिक्-सङ्घः विश्व-मल्लयुद्ध- सङ्घस्य समक्षं, पैरिस-ओलिम्पिक्-क्रीडायां मल्लयुद्धे विनेश् फोगाट्-इत्यस्याः अयोग्यतायाः विरुद्धं विरोध-प्रत्यावेदनम् अकरोत्। डा. माण्डविया लोकसभायां अवदत् यत् केन्द्रम्, विनेश इत्यस्यै सर्वं साहाय्यं प्रददाति इति। सः उक्तवान् यत्, अस्मिन् विषये प्रधानमन्त्रिणा नरेन्द्रमोदिना, भारतीय-ओलिम्पिक्-सङ्घस्य अध्यक्षया पी. टी. उषा इत्यनया सह वार्तालापः कृतः । डा. माण्डविया अवदत् यत्, अस्मिन् विषये सर्वाः सम्भावनाः अन्वेष्टुं भारतीय-ओलिम्पिक्-सङ्घः आदिष्टः अस्ति। क्रीडामन्त्री अवदत् यत् विनेश् फोगाट् इत्येषा पंचाशत् कि. ग्रा. भारवर्गे क्रीडति स्म, तस्याः भारः विहितसीमायाः अपेक्षया शतम्, ग्राम्-मितः अधिकः जातः।





### विनेश-फोगाट्-इत्यस्याः कृते प्रधानमन्त्री नरेन्द्रमोदी सान्त्वनाम् अयच्छत्

पेरिस-ओलम्पिक-क्रीडायां महिला-मल्लयुद्धस्य अन्तिम-क्रीडायाः कृते अयोग्यतां प्राप्तायाः विनेश-फोगाट्-इत्यस्याः कृते प्रधानमन्त्री नरेन्द्रमोदी सान्त्वनाम् अयच्छत्। सामाजिक संजालीय- सन्देशे प्रधानमन्त्री मोदी उक्तवान् यत् एषा दुःखदायिका वार्ता हृदयविद्राविका वर्तते । सः अवदत् यत् मल्लयुद्धे फोगाट् तदृशी एका विजेत्री अस्ति या भारतस्य गौरवः, अथ, प्रत्येकस्य भारतीयस्य कृते प्रेरणादायिका अपि वर्तते । अवधेयं यत् इतः पूर्वं,पैरिस-ओलिम्पिक्स्-क्रीडायां भारतस्य दुर्भाग्यपूर्ण घटनाक्रमे, मल्लयोद्धी विनेश् फोगट् इत्येषा पंचाशत् किलोग्राम् फ्रीस्टैल् इति मल्लयुद्धस्य अन्तिम स्पर्धायाः कृते कतिपय-ग्राम्-मितात् अधिक-भारस्य कारणात् अन्तिमचक्रे अयोग्या इति घोषिता । भारतीय-ओलिम्पिक्-सङ्ङ्घः एकस्मिन् वक्तव्ये अवदत् यत् रात्रौ दलस्य प्रयत्नेन अपि गतप्रातःकालेऽपि फोगाट् इत्यस्याः भारः पंचाशत् किलोग्राम्-तः अधिकः आसीत्। पूर्वं, विनेश् फोगट् इत्येषा विश्वस्य प्रथमस्थाने स्थिताम्, टोक्यो विंशति-विंशति वर्षस्य विजेत्रीं, जपान्-देशस्य यू सुसाकी इत्येनां च पराजित्य प्रागुपान्त्यचक्रं प्रविष्टवती। पश्चात् प्रागुपान्त्यचक्रे, इयं विनेशः उक्रेन्-देशस्य ओक्साना लिवाच् इत्येनं सप्त-पंच अर्कैः पराजित्य उपान्त्यचक्रं प्रविष्टवती। उपान्त्य-चक्रे फोगाट्, क्यूबा देशस्य युस्नेलिस् गुज्मन् लोपेज़ इत्येषां पराजित्य ओलिम्पिक्-क्रीडायाः अन्तिमचक्रे प्रविश्य इतिहासं रचितवती ।

## सुभाषितम्

**आलस्यं हि मनुष्याणां**
**शरीरस्थो महान् रिपुः।**
**नास्त्युद्यमसमो बन्धुः**
**यं कृत्वा नावसीदति ।।**

**भावार्थः-** आलस्य मनुष्यों के शरीर में रहने वाला घोर शत्रु है और उद्योग के सामान उनका कोई बन्धु नहीं है; क्योंकि उद्योग करने वे मनुष्य के पास दुःख नहीं आते।

*✍ प्रतीकसाठ्ये मुम्बई*

**सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति**

कार्यालयः
**हिमसंस्कृतम् प्रकाशनम्**
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११

## गुरुदेवस्य विचारचाक-चिक्येन संसारः अनन्त-कालाय प्रकाशितो भविष्यति- गृहमन्त्री



राष्ट्रप्रतिष्ठितकविं, लेखकं, महद्दार्शनिकं, समाजपरिष्कारकं, शिक्षाविदं च रवीन्द्रनाथ-टैगोरवर्यं, तस्य पुण्यतिथौ सश्रद्धं पुष्पाञ्जलिः समर्पिता । नोबेलाख्य-पुरस्कार-विजेतुः, राष्ट्रगानस्य रचयितुश्च स्मरणे गृहमन्त्रिणा अमितशाहेन प्रोक्तं यत् गुरुदेवःन केवलं स्वकृतिभिः, आत्मसंस्कृतेः, परम्परायाः च भारतस्य जागरूकतायाः दिशि समाजं उत्प्रेरितवान् । अपि तु देशवासिषु आत्मसम्मानस्य भावनायाः संसारेण स्वतन्त्रतासंघर्षाय एकां नूतनाम् ऊर्जामपि संचारितवान् । श्रीशाहेन उक्तं यत् विश्वभारती-विश्वविद्यालयस्य स्थापनां कृत्वा गुरुदेवेन आसंसारं भारतीयदर्शनस्य दिग्दर्शनं कारितम् । श्रीशाहेन उक्तं यत् गुरुदेवस्य विचारचाकचिक्येन संसारः अनन्तकालाय प्रकाशितो भविष्यति । कृष्णांगार-खनन-मन्त्री जी. किशन-रेड्डी, खाद्य-वितरणमन्त्री प्रह्लादजोशी, इत्येतावपि गुरुदेवाय श्रद्धासुमनानि अर्पितवन्तौ । रवीन्द्रनाथ-ठागोरः साहित्य-संगीत-कलानां च क्षेत्रेष्वपि सुविख्यातः आसीत् । तेन राष्ट्रगानं निर्मितम्, स्वातन्त्र्यसंघर्षे च भागो भजितः ।

## द्विदिवसीय-यात्रार्थं न्यूजीलैण्ड्देशस्य आक्लैण्ड्-नगरं प्राप्तवती राष्ट्रपतिः द्रौपदीमुर्मू



राष्ट्रपतिः द्रौपदी मुर्मू, गवर्नर जनरल् डेम् सिण्डी किरो इत्यस्याः निमन्त्रण-पुरस्सरम्, गत अपराह्णे द्विदिवसीय-यात्रार्थं न्यूजीलैण्ड्देशस्य आक्लैण्ड्-नगरम् आगतवती । सा गवर्नर जनरल् डेम् सिण्डी किरो इत्यनया सह, प्रधानमन्त्रिणा क्रिस्टोफर लक्सन् इत्यनेन सह द्विपक्षीयसमागमं करिष्यति। राष्ट्रपतिः वेलिंग्टननगरे अन्ताराष्ट्रिय-शिक्षासम्मेलनम् अपि सम्बोधयिष्यति, यत्र भारतं विशिष्टातिथिरूपेण वर्तते । सा आक्लैण्ड्-नगरे सामुदायिक-स्वागत-समारोहे भारतीय- प्रवासी-भारत-मित्रैः सह अपि संवादं करिष्यति।

## नेपाले प्रचण्डवृष्ट्या

### भूस्खलनेन च बाग्लुङ्ग-गुमली-नगरयोः विगत-२४ घण्टासु १२ जनानां मृत्युः



**हिमसंस्कृतवार्ताः।** नेपाले प्रचण्डवृष्ट्या भूस्खलनेन च बाग्लुङ्ग-गुमली-नगरयोः विगत-२४ घण्टासु १२ जनानां मृत्युः । पृथक् पृथक् भूस्खलनस्य घटनासु १० जनाः घातिताः अन्ये चत्वारः जनाः अदृश्याः सन्ति। बाग्लुङ्गस्य प्राथमिकस्वास्थ्यकेन्द्रे घातितानां चिकित्सा क्रियते। भूस्खलने निमज्जितानां चतुर्णां जनानां अन्वेषणार्थं उद्धारकार्यक्रमः आरब्धः। उद्धार-कार्यक्रमाय सेनायाः चक्रविमानं प्रेषितम्, परन्तु दुर्गतेः कारणात् चक्रविमानं प्रभावितक्षेत्रे अवतरितुं न शक्तवान् । जूनमासस्य १० दिनाङ्के नेपाले मानसूनस्य आरम्भात् आरभ्य देशे वर्षासम्बद्धेषु घटनासु आहत्य १६५ जनानां मृत्युः अभवत् ।

## बाङ्गलादेशे नूतनाधिकारिणः देशस्य आरक्षि- बलस्य पुनर्गठनं कृतवन्तः



बाङ्गलादेशे शीर्षस्तरीय-सेनायाः महत्तरं परिवर्तनं कृत्वा, नूतन अधिकारिणः देशस्य आरक्षि- बलस्य पुनर्गठनं कृतवन्तः। नूतनशासनेन, रैपिड एक्शन बटालियन् इत्यस्य महानिदेशकरूपेण कार्यं कृतस्य, अपर-आरक्षि-महानिरीक्षकस्य, मोहम्मद हारुन अर रशीदस्य स्थाने, ए.के.एम शाहिदुर-रहमान इत्यमुं नूतन-महानिदेशकरूपेण स्थापितम् । मोहम्मद मैनुल हसनः, ढाकामहानगर-अरक्षि-बलस्य नूतनायुक्तः नियुक्तः अस्ति । अवधेयमस्ति यत् गृहमन्त्रालयस्य अन्तर्गतं लोकसुरक्षाविभागेन अस्मिन् विषये अधिसूचना अधिसूचिता । इतः पूर्वं बांग्लादेशस्य राष्ट्रपतिना पूर्वसर्वकारस्य भंगं कृत्वा नूनत आन्तरिम-सर्वकारस्य घटनं कृतमासीत्

## उपराष्ट्रपतिः जगदीपधनखड़ः विज्ञानभवने हस्तशिल्प-दिवससमायोज्यमाने कार्यक्रमे भागमभजत्

राष्ट्रे दशमः हथकरघा इति हस्तशिल्पदिवसः ह्यः समाचरितम्। उपराष्ट्रपतिः जगदीपधनखड़ः अवसरेऽस्मिन् विज्ञानभवने समायोज्यमाने कार्यक्रमे भागमभजत् । तेनोक्तं यत् भारतं निकटभविष्ये विश्व-आर्थिकदृष्ट्या पञ्चमतः तृतीय-स्थानं प्रति समागमिष्यतीति । अवसरेऽस्मिन् प्रधानमन्त्री नरेन्द्रमोदी देशवासिभ्यः शुभकामनाः अयच्छत् । सामाजिक-प्रसार-तन्त्रजाले प्रसारिते एकस्मिन् सन्देशे प्रधानमन्त्रिणा उक्तं यत् आराष्ट्रम्, हस्तशिल्पस्य समृद्धन्यासे जीवन्त- परम्परायाञ्च गर्वानुभूतिं करोति । तेन राष्ट्रस्य कलाधर्मिणां प्रयासाः प्रशंसिताः । वोकल्-फोर- लोकल् इति क्षेत्रीयोत्पादनं प्रति स्वकीया प्रतिबद्धतापि आम्रेडिता ।

# आगामिषु ६ मासेषु हिमाचलं ५० मेगावाट् सौर ऊर्जायाः दोहनं करिष्यति- मुख्यमंत्री सुखविन्दरसिंहसुक्खुः



**हिमसंस्कृतवार्ताः - शिमला।** मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः ऊर्जाविभागस्य वरिष्ठाधिकारिभिः सह समीक्षासभां कृतवान्। सभायां सः राज्ये सौर ऊर्जायाः उत्पादनं वर्धयितुं आवश्यकतां बोधितवान्। ऊना-मण्डलस्य पेखुबेलायां ३२ मेगावाट-सौर-विद्युत्परियोजना स्थापिता, कुटलैहड़-विधानसभाक्षेत्रे १० मेगावाट-सौरविद्युत्परियोजनायाः निर्माणं प्रचलति, गगरेटविधानसभाक्षेत्रे ५ मेगावाट- सौरविद्युत्-परियोजनायाः निर्माणं प्रचलति इति सः अवदत्। राज्यम् आगामिषु षड्मासेषु प्रायः ५० मेगावाट सौर ऊर्जायाः दोहनं सुनिश्चितं करिष्यति। सः सौर ऊर्जा परियोजनानां कार्यं शीघ्रं कृत्वा समयनिर्धारितरूपेण सम्पन्नं कर्तुं तथा च नूतनानां परियोजनास्थलानां परिचयं कर्तुं अधिकारिभ्यः निर्देशं दत्तवान्। मुख्यमंत्री सुखविन्दरसिंहसुक्खुः अवदत् यत् राज्यस्य जनानां सौर ऊर्जा-उत्पादनक्षेत्रे प्रोत्साहनं क्रियते येन राज्यस्य जनाः एताभ्यः परियोजनाभ्यः आजीविकाम् अर्जयितुं शक्नुवन्ति। सः अवदत् यत् एताः परियोजनाः हिमाचालवासिभ्यः आबंटिताः भविष्यन्ति, राज्यस्य जनाः च सौर ऊर्जापरियोजनानां स्थापनायै प्रोत्साहिताः भविष्यन्ति। मुख्यमन्त्री उक्तवान् यत् विद्युत्-याचना निरन्तरं वर्धमाना अस्ति, अतः जल-शक्त्या सह सौर-ऊर्जायाः अधिकतमं दोहनं सुनिश्चितं क्रियते। सौर ऊर्जा पर्यावरणस्य अनुकूलः नवीकरणीयः ऊर्जायाः स्रोतः अस्ति। एतेन कार्बन-उत्सर्जनं न्यूनीकर्तुं शक्यते, जीवाश्म-इन्धनस्य उपरि निर्भरतां न्यूनीकर्तुं शक्यते च। सौरशक्तिपरियोजनानां परिपालनं सुलभतया कर्तुं शक्यते, दीर्घायुषः च भवति। २०२६ तमस्य वर्षस्य मार्चमासस्य ३१ दिनाङ्कपर्यन्तं हिमाचलप्रदेशं हरित ऊर्जाराज्यरूपेण स्थापयितुं प्रतिबद्धतां पुनः उक्त्वा मुख्यमन्त्री उक्तवान् यत् एतत् लक्ष्यं प्राप्तुं राज्यसर्वकारः हरित-उद्योगानाम् प्रचारं करोति। सः अवदत् यत् वर्तमानकाले जलवायुपरिवर्तनं विश्वे सर्वाधिकं आव्हानं वर्तते, राज्यसर्वकारः हरितपरिकल्पनाद्वारा वैश्विकतापस्य प्रभावं न्यूनीकर्तुं कार्यं कुर्वन् अस्ति। राज्यसर्वकारः ई-वाहनानां संचालनं प्रवर्धयति। हिमाचलपथपरिवहननिगमस्य बसयानानि इलेक्ट्रॉनिकबससमूहे परिणमयन्ते।

# HP Education Department : राज्यस्य ५६७ विद्यालयेभ्यः चतुर्थश्रेणी-कर्मचारीणां बहूद्देश्यीयकर्मचारिणां प्रतिस्थापनस्य प्रक्रिया आरब्धा




**हिमसंस्कृतवार्ताः - शिमला।** हिमाचलप्रदेशे छात्राणां शून्यसंख्यायुक्तानां ९९ विद्यालयानां तथा च ४६८ विद्यालयानां चतुर्थश्रेणीकर्मचारिणां, बहूद्देश्यीयकर्मचारिणां, जलवाहकानां च प्रतिस्थापनस्य प्रक्रिया अन्येषु समीपस्थेषु विद्यालयेषु आरब्धा अस्ति। बुधवासरे प्राथमिकशिक्षानिदेशालयेन सर्वेभ्यः जिला-उपनिदेशकेभ्यः पत्रं निर्गतं, अन्यत्र कर्मचारिणां नियुक्तिः कर्तुं निर्देशाः प्रसारिताः। एतेषु विद्यालयेषु कार्यं कुर्वन्तः शिक्षकाः आवश्यकतायुतानां विद्यालयेषु प्रतिस्थापनस्य प्रक्रिया अपि अद्यत्वे प्रचलति। अधुना राज्यमन्त्रिमण्डलेन शून्यछात्रसङ्ख्यायाः ८९ प्राथमिकविद्यालयाः १० माध्यमिकविद्यालयाः च पिधातुं निर्णयः कृतः अस्ति। एतदतिरिक्तं पञ्च वा न्यूनाधिकछात्रसङ्ख्यायुक्ताः ४०१ प्राथमिकविद्यालयाः ६७ माध्यमिकविद्यालयाः च द्वित्रिकिलोमीटर्पर्यन्तं त्रिज्यायां विद्यालयेषु विलीनीकरणस्य निर्देशाः दत्ताः सन्ति। अस्यां शृङ्खलायां अधुना शिक्षानिदेशालयेन एतेषु विद्यालयेषु कार्यं कुर्वतां कर्मचारिणां परिवर्तनस्य प्रक्रिया आरब्धा अस्ति।

# निजीचिकित्सालयानाम् तुलनपत्राणां अन्वेषणं कुर्वन्नस्ति प्रवर्तननिदेशालयः

## अधुना स्वास्थ्यविभागस्य अभिलेखैः सह प्रतिपरीक्षणं करिष्यति अन्वेषणसंस्था




**हिमसंस्कृतवार्ताः - कार्यालयीयः प्रतिनिधिः।** प्रवर्तननिदेशालयः अनुकृत- आयुष्मानपत्रस्य कारणेन कोटिरूप्यकाणां वञ्चनप्रकरणे निजीचिकित्सालयानां तुलनापत्रस्य अपि अन्वेषणं करिष्यति। ईडी निजीचिकित्सालयानां तुलनपत्राणां स्वास्थ्यविभागस्य अभिलेखैः सह प्रतिपरीक्षणं (क्रॉस मैच) करिष्यति। निजीचिकित्सालयेषु अन्वीक्षणे प्रवर्तननिदेशालयेन स्वास्थ्ययोजनानां बहवः अभिलेखाः ग्रहीताः सन्ति। अनुकृत-आयुष्मानपत्रस्य कारणेन कोटिरूप्यकाणां वञ्चनप्रकरणे अपि ईडी अभियुक्तेभ्यः प्रश्नोत्तरं करिष्यति। प्रवर्तन-निदेशालयेन अभियुक्तानां प्रश्नोत्तरस्य समये अनुकृत- आयुष्मानपत्रस्य कारणेन कोटिरूप्यकाणां वञ्चनप्रकरणेन सह सम्बद्धाः बहवः महत्त्वपूर्णाः पटाक्षेपाः भवितुं शक्नुवन्ति। ईडी चिकित्सालयानाम् सम्पत्तिषु अपि अन्वेषणं कुर्वन् अस्ति। आयुष्मानयोजनायाः अद्यावधि ईडी-संस्थायाः अन्वेषणस्य अनुसारम् अस्मिन् प्रकरणे प्रायः २५ कोटिरूप्यकाणाम् अपराध-आयः सम्मिलितः अस्ति। गतसप्ताहे बुधवासरे प्रवर्तन-निदेशालयेन दिल्ली, चण्डीगढं, पञ्जाबः तथा हिमाचलप्रदेशस्य काङ्गड़ा, ऊना, शिमला, मण्डी, कुल्लू च जनपदेषु धनशोधननिवारणविधानस्य २००२ इत्यस्य प्रावधानानाम् अन्तर्गतं २० स्थानेषु निरीक्षणं कृतम् आसीत्। ईडी इत्यनेन निरीक्षणं कृत्वा ८८ लक्षरूप्यकाणि नगदं, चत्वारि बैंकलॉकर, १४० सम्बद्धाः वित्तकोषसंख्याः ग्रहीताः आसन्। एतस्य अतिरिक्तं ईडी इत्यनेन अचल-चलसम्पत्तयः, खातापुस्तकानि इत्यादीनि अभिलेखानि च अतिरिक्तं मोबाईलफोन/ आइपैड, हार्डडिस्क, पेन ड्राइव इत्यादिरूपेण १६ डिजिटल-उपकरणाः अपि स्वाधीकृताः सन्ति इदानीं ईडी एतेषां उपकरणानां, वित्तकोषसंख्यानां च अभिलेखानां परीक्षणं कुर्वन् अस्ति।

## आयुष्मानस्य अनन्तरं

### हिमकेयरस्य अन्वेषणं भविष्यति


आयुष्मानयोजनायाः अनन्तरं ईडी हिमकेयरयोजनायाः अभिलेखानां अपि निरीक्षणं करिष्यति। सम्प्रति ईडी अनुकृत- आयुष्मानपत्रस्य कारणेन कोटिरूप्यकाणां वञ्चनप्रकरणे चिकित्सालयानां सम्पत्तिः अभिलेखानाम् अन्वेषणं कुर्वन् अस्ति। अभियुक्तैः अवैधरूपेण कियत् धनं प्राप्तम् इति प्रवर्तननिदेशालयेन ज्ञायते।

# HP Vidhansabha: विधानसभासमित्याः सदस्याः डिजिटलरूपेण सभासु सम्मिलितुं शक्नुवन्ति, सभापतिः अधिकारिभ्यः निर्दिष्टवान्



**हिमसंस्कृतवार्ताः - शिमला।** हिमाचलप्रदेशस्य विधानसभाध्यक्षः कुलदीपसिंहपठानिया विधानसभा- सचिवालयस्य समितीनां कार्यकरणं सुदृढं, तर्कसंगतं, प्रभावी च भवतु एतदर्थं मुख्यसमितिकक्षे समितीनां अधिकारिभिः सह गोष्ठीं कृतवान्। विधानसभाध्यक्षः अगस्तमासस्य ३ दिनाङ्के समितीनां अध्यक्षैः सह महत्त्वपूर्णं समागमं कृतवान् अस्ति। विधानसभाध्यक्षः अवदत् यत् सः समितिकार्यं प्रभावी, तर्कसंगतं च कर्तुम् इच्छति। सः अवदत् यत् सः समितिकार्ये दक्षतां तीव्रताम् आनेतुं समर्थः अस्ति, येन लम्बितजनहितकार्यस्य विषये सम्बन्धितविभागेभ्यः कठोरसंज्ञानं गृहीतुं शक्यते। पठानिया उक्तवान् यत् अधुना समितिसदस्याः डिजिटलरूपेण अपि सभासु सम्मिलितुं शक्नुवन्ति। अधिकारिभ्यः निर्देशः दत्तः यत् ते तत्क्षणमेव ऑनलाइन-सुविधायाः सङ्गतिं कर्तुं उपकरणानां व्यवस्थां कुर्वन्तु, येन कोरम-अपूर्ति-कारणात् समिति-कार्यं बाधितं न भवति। पठानिया उक्तवान् यत् अधिकारिणः स्वस्वसमित्याः कृते पृथक् पृथक् ई-मेल-पत्राणि अपि निर्मातव्यानि, येन सदस्येभ्यः व्हाट्सएप-ई-मेल-माध्यमेन आवश्यकाः सूचनाः प्रेषयितुं शक्यन्ते। पठानिया समितिपदाधिकारिभ्यः निर्देशं दत्तवान् यत् नवनिर्वाचितसदस्याः समित्याः कार्याणि, क्रियाकलापाः, सदस्यानां के अधिकाराः च सन्ति इति विषये अवगताः भवेयुः। एतेन समितिकार्ये तेषां रुचिः वर्धते, समितिसभासु ते अधिकं भागं ग्रहीतुं शक्नुवन्ति। पठानिया अवदत् यत् समितिपदाधिकारिणः, खण्डाधिकारिणः च स्वयं पूर्णतया सज्जाः सन्तः सभासु आगच्छेयुः, समितिसभायाः प्रश्नावलीः अपि सज्जीकर्तव्या। अस्मिन्नवसरे विधानसभासचिवः यशपाल शर्मा, विधानसभायाः संयुक्तनिदेशकः हरदयाल भारद्वाजः, समिति- अधिकारी बेगरामकश्यपः, राकेशठाकुरः, रीता शर्मा, मंजू शर्मा, संतोखसिंहः, जितेन्द्रसिंहकंवरः, संजयठाकुरः, बेनीप्रसादः एवं समितीनां अनुभागाधिकारिणः उपस्थिताः अभवन्।

# जनगणमन...राष्ट्रीयगानस्य रचयिता रवीन्द्रनाथटैगोरः



वङ्गभाषायाः कविः, कथालेखकः, सङ्गीतज्ञः, नाटककरचयिता च सन् सः १९ शतकस्य अन्ते विंशतितमशतकस्य आरम्भे च वङ्गसाहित्यस्य वङ्गसङ्गीतस्य च विनूतनं रूपं प्राददात् । तेन रचितस्य सूक्ष्मसंवेदनयुक्तस्य नवीनस्य उत्कृष्टस्य च गीताञ्जलीकाव्यस्य कृते १९१३ तमेवर्षे नोबेल्-साहित्यप्रशस्तिः प्राप्ता । एतेन सः एशियाखण्डे प्रथमनोबेल्-प्रशस्तिविजेता जातः ।

कल्कत्तायाः पिरालिब्राह्मणकुटुम्बे जातः रवीन्द्रः । स्वस्य अष्टमे वयसि पद्यरचनम् आरब्धवान् । स्वस्य षोडशे वयसि सः 'भानुशिङ्हो' (सूर्यसिंहः)इत्येतेन गुप्तनाम्ना प्रथमं महत्त्वपूर्णं पद्यं प्राकाशयत् । १८७७ तमे वर्षे प्रथमां लघुकथां नाटकञ्च अलिखत् । ब्रिटिश्शासनस्य दृढं खण्डनं कुर्वता तेन भारतीयस्वातन्त्र्यान्दोलनस्य प्रोत्साहनं कृतम् । तेन रचिताः कृतयः तेन संस्थापितः विश्वभारतीविश्वविद्यालयश्च जगते तेन दत्तानि प्रमुखानि उपायनानि ।

भारतीयसाम्प्रदायिककठिनसीमातः बहिरागतः रवीन्द्रः वङ्गकलाप्रकाराय नूतनां शोभाम् आनयत् । तेन रचिताः दीर्घकथाः, लघुकथाः, पद्यानि, नृत्यनाटकानि, प्रबन्धाश्च राजनैतिक-सामाजित-व्यक्तिगतविषयान् प्रतिफलन्ति । गीताञ्जली (पद्यानि), गोर (सुन्दरमुखी), घरे बैरे (गृहं प्रपञ्चञ्च) इत्यादयः तस्य प्रसिद्धाः कृतयः । तेन रचितानि पद्यानि, लघुकथाः, दीर्घकथाः च साहित्यमौल्याय, जनभाषाप्रयोगाय, विचारशीलवास्तविकतायाः अभिव्यक्त्यै तत्त्वशास्त्रावलोकनाय च श्लाघार्हाः सन्ति । तेन रचितयोः द्वयोः गीतयोः राष्ट्रमान्यता प्राप्ता अस्ति - जन गण मन भारतस्य राष्ट्रगीतत्वेन, अमर् शोनर् बांला बांदेशस्य राष्ट्रगीतत्वेन अङ्गीकृतमस्ति ।

## आरम्भजीवनम् (१८६१-१९०१)

रवीन्द्रनाथः कल्कत्तानगरस्य जोरसङ्कोभवने जन्म प्राप्नोत् । तस्य पिता देवेन्द्रनाथठाकूरः(१८०७-१९०५), माता शारदादेवी (१८२०-१९०५) । दम्पत्योः जीवत्सु त्रयोदशसु पुत्रेषु अयमेव कनीयान् । ठाकूरकुटुम्बस्य पूर्वजाः आदिधर्मस्य ब्राह्मोसंस्थापकाः । माता अस्य बाल्ये एव दिवङ्गता । पिता सर्वदा प्रवासे भवति स्म इत्यतः बालकः रवीन्द्रः गृहस्य सेवकानां पालनेन एव वर्धितः । भित्तेः अन्तः प्रचलत् शिक्षणम् अनिच्छन् रवीन्द्रः आभवनम् अटति स्म । पनिहटि इत्यादिषु स्थलेषु अटनं ग्रामप्रदेशस्य सरलसुन्दरपरिसरे कालयापनं तस्मै अत्यन्तं रोचते स्म । एकादशे वयसि तस्य उपनयनसंस्कारः सम्पन्नः । तदनन्तरं सः पित्रा सह भारतस्य पर्यटनम् आरब्धवान् । १८७३ तमे वर्षे फेब्रवरीमासस्य १४ दिनाङ्के कल्कत्तातः ताभ्यां प्रस्थितम् । ततः बहून् मासान् यावत् ताभ्यां भारते अटितम् । शान्तिनिकेतननामिकां पैतृकभूमिं दृष्ट्वा अमृतसरे उषितवन्तौ । ततः 'डाल्हौसि'नामकं हिमालयगिरिधाम अगच्छताम् । तत्र रबी-जीवनचरितम्, इतिहासः, खगोलविज्ञानम्, आधुनिकविज्ञानं संस्कृतञ्च अधीतवान् । शास्त्रीयकाव्यानाम् आन्तर्यञ्च तेन अवलोकितं गभीरतया । १८७७ तमे वर्षे अनेकानि प्रमुखकाव्यानि तेन रचितानि । तेषु अन्यतमम् अस्ति मैथिलीशैल्या रचितः दीर्घपद्यसङ्ग्रहः । विद्यापतिनामकः कविः मैथिलीशैल्याः आविष्कर्ता । १७ शतमाने अदृश्यंगताः Vaiṣṇava कवेः कृतयः Bhānusiṃha एताः इति विनोदेन वदति स्म रवीन्द्रः । भिकारिणि (१८७७, भिक्षुकी - वङ्गभाषायाः प्रथमा लघुकथा)सन्ध्या सङ्गीतनामकं (१८८२) प्रसिद्धं पद्यं, निर्झरेर् स्वप्नभङ्गः इत्यादयः कृतयः तेन १८८२ तमे वर्षे लिखिताः ।



१९२४ तमे वर्षे त्सिङ्घ्वविश्वविद्यालये ठाकूरः

इङ्ग्लेण्ड्देशस्य पूर्वससेक्स्प्रदेशस्य ब्रिघ्टन्नगरे विद्यमानं सार्वजनिकविद्यालयं प्राविशत् १८७८ तमे वर्षे । पितुः अपेक्षानुगुणं न्यायवादिना भवितुं सः लण्डन् युनिवर्सिटि कालेज् मध्ये अध्ययनम् अकरोत् । किन्तु शेक्स्पियर्, रेलिजियो मेडिसि, कोरिलियनस्, आण्टोनि क्लियोपात्र इत्यादीनां परिपूर्णम् अध्ययनं कर्तव्यम् इति धिया सः विद्यालयम् अत्यजत् । १८८० तमे वर्षे पदवीं विनैव वङ्गं प्रत्यागतवान् । १८८२ तमस्य वर्षस्य डिसेम्बर्मासस्य ९ दिनाङ्के तेन मृणालिनीदेवी (१८७२-१९००) परिणीता । जन्म प्राप्तवत्सु पञ्चसु अपत्येषु उभौ प्रौढावस्थातः पूर्वमेव मृतवन्तौ । १८९० तमे वर्षे अधुना बाङ्ग्लादेशे विद्यमाने शिलैदाहे स्थितायाः विशालभूसम्पतेः निर्वहणे आत्मानं न्ययोजयत् । १८९८ तमे वर्षे तस्य पत्नी पुत्राश्च तत्र आगताः । १८९१ - १८९५ - अयं कालः ठाकूरस्य 'साधनावधिः' इति उच्यते । सः अवधिः सर्जनशीलः आसीत् । चतुरशीतिः कथाभिः युक्तः गल्पगुच्छनामकः सङ्ग्रहः, सम्पुटत्रयस्य अर्धांशापेक्षया अधिकाः कथाः च अस्मिन् अवधौ एव लिखिताः । वङ्गजीवनशैल्याः विशेषतया ग्रामजीवनस्य विशालां व्याप्तिं सः उपहासदृष्ट्या भावनात्मकप्रभावेण च चित्रितवान् अस्ति ।

## शान्तिनिकेतनम् (१९००-१९३२)

१९०१ तमे वर्षे ठाकूरः शिलैदाहतः शान्तिनिकेतनम् आगतः । तत्र विक्फ्-मन्दिरं नाम आश्रमं समस्थापयत् । अमृतशिलया अलङ्कृतं मन्दिरं तत् । विविधानि सस्यानि, वृक्षाः, उद्यानं, ग्रन्थालयः, प्रयोगशाला च तत्र आसन् । ठाकूरस्य पत्नी पुत्रद्वयं च तत्रैव मरणं प्राप्तवन्तः । १९०५ तमे वर्षे जनवरीमासस्य १९ दिनाङ्के तस्य पिता दिवङ्गतः । तदारभ्य पित्रार्जितं धनं प्रतिमासं प्राप्नोति स्म सः । त्रिपुरस्य महाराजात् किञ्चित् धनं प्राप्नोत् । कुटुम्बस्य आभरणानां विक्रयणात् च धनं प्राप्तम् । पुर्यां समुद्रतीरे विद्यमानात् भवनाच्च धनं प्राप्तम् । तस्य कृतीनां द्वारा च गौरवधनं (रू ९०००) प्राप्नोत् ।एतावता देशे विदेशे च विद्यमानाः बहवः बङ्गालीवाचकाः तस्य अभिमानिनः जाताः आसन् । १९०१ तमे वर्षे नैवेद्यकृतिं, १९०६ तमे वर्षे खेयनामिकां कृतिञ्च प्राकाशयत् । अस्मिन् एव अवधौ स्वस्य गीतानि मुक्तछन्दोबद्धानां पद्यानां रूपेण अनूदितुं तेन । साहित्यक्षेत्रस्य नोबेल्प्रशस्तिः प्राप्ता अस्ति इति विषयः तेन नवेम्बर्मासस्य १४ दिनाङ्के ज्ञातः । तेन रचिताः साहित्यकृतयः तत्रत्यः आदर्शवादश्च स्वीडिश् अकाडेम्या बहुमानिता ।१९०५ तमे वर्षे ब्रिटीष्यक्राधिपत्येन टाकूरः नैट्बिरुदा सम्मानितः

# धारावाहिकं गीताप्रश्नोत्तरम्- ७३



**अर्जुनः-** भगवन्! परमात्मना सह आत्मनः सम्बन्धस्य अवबोधः कथमिति तु त्वया इतः पूर्वं सम्यगुक्तम्। परन्तु प्रभो! प्रकृतिजन्यात् शरीरात् सम्बन्धविच्छेदः कथं सम्भवेत्, तदर्थं किं करणीयम्? कृपया तदुच्यताम्।

**श्रीकृष्णः-** अर्जुन! जगति सर्वाण्यपि कर्माणि नैरन्तर्येण प्रकृतिरेव करोति इत्येतत् सम्यक् विज्ञाय मनुष्यः आत्मनि कर्तृत्वस्य अभावम् अनुभवति। यदा सः समस्तप्राणिनां पृथक् पृथक् शरीरसम्बद्धान् भावान्, प्रकृतिजान्, प्रकृतिस्थान् च पश्यति तदा सः परमात्मानं प्राप्नोति। ततः तस्य प्रकृतेः सम्बन्धाभावः भवति।

**अर्जुनः-** तत्सम्बन्धाभावस्य अनन्तरं किं भवति भगवन्?

**श्रीकृष्णः-** हे कुन्तीपुत्र अर्जुन! पुरुषोऽयम् अनादित्वात्, निर्गुणत्वात् च स्वयम् अविनाशी परमात्मस्वरूपः एव वर्तते। शरीरस्थः सन्नपि वस्तुतः नायं किमपि, किञ्चिदपि वा करोति, न च शरीरेण कदाचिदयं लिप्यते एव। अर्थात् अयं कर्ता, भोक्ता च नास्ति कदाचिदपि।

**अर्जुनः-** भगवन्! अयं पुरुषः कथं लिप्तः न भवति?

**श्रीकृष्णः-** पार्थ! यथा आकाशः सर्वत्र व्याप्तः सन्नपि अत्यन्तं सूक्ष्मत्वात् केषुचिदपि व्यक्तिवस्तुपदार्थादिषु कदाचिदपि न लिप्यते, तद्वत्, सः पुरुषः सर्वत्र परिपूर्णः सन्नपि कस्मिंश्चिदपि शरीरे किञ्चिन्मात्रमपि न अवलिप्यते।

**अर्जुनः-** पुरुषोऽयं कर्ता कथं न स्यात् भगवन्?

श्रीकृष्णः:- हे भरतवंशीय कुन्तीनन्दन! सः पुरुषः कर्ता न भवति एव। मन्यतां, यथा एकाकी सनेव सूर्यः सम्पूर्णं विश्वं प्रकाशयति, परन्तु तस्मिन् प्रकाशकत्वेन न कदापि अभिमानः आयाति। तथैव अयं क्षेत्रज्ञः सम्पूर्णानि वस्तुशरीरादीनि क्षेत्राणि प्रकाशयति, परन्तु तस्मिन् न कदापि कर्तृत्वाभिमानः आयाति, प्रत्युत सः प्रकाशकः एव तिष्ठति। अत एव ये मनुष्याः ज्ञाननेत्रेण क्षेत्रक्षेत्रज्ञयोर्भेदं, प्रकृतिं, तत्कार्यञ्च पृथक् अनुभवन्ति, ते परमात्मानं प्राप्नोति, इत्यत्र न सन्देहः इति, शुभम्। (१३/२९-३४) ॐ श्रीमद्भगवद्गीतामूलग्रन्थम् आधारीकृत्य सज्जीकृते गीताप्रश्नोतरेऽस्मिन् क्षेत्रक्षेत्रज्ञविभागयोगो नाम त्रयोदशोऽध्यायः सम्पूर्णः। श्रीकृष्णार्पणमस्तु! **(अनुवर्तिष्यते) -नारदोपाध्यायः।**

# बालभारती पब्लिकविद्यालये संस्कृते राष्ट्रभक्तिगीतगानस्पर्धा सम्पन्ना



बालभारती पब्लिक विद्यालय गंगाराम चिकित्सालयमार्गस्य माध्यमिक-संस्कृतविभागेन आयोजितस्य स्वतंत्रतादिवसस्य सप्ताहिक- कार्यक्रमस्य अंतर्गतम् अंतःसदनीया संस्कृते राष्ट्रभक्तिगीतगानस्पर्धा सम्पन्ना अभवत्। एषा स्पर्धा **जयतु संस्कृतम् जयतु भारतम्** इति शीर्षकेण आयोजिता। अस्यां स्पर्धायां सर्वेषां सदनानां विद्यार्थिनः उत्साहपूर्वकं संस्कृतभाषया सामूहिकं देशभक्तिगीतानां गानं कृत्वा जनान् मन्त्रमुग्धीकृतवन्तः। अस्यां स्पर्धायां अष्टौ सदनस्य विद्यार्थिनः अष्ट गीतानि अगायन्। कार्यक्रमस्य मुख्यातिथिः विद्यालयस्य पूर्वशिक्षिका पूनमशर्मावर्या कार्यक्रमस्य मुक्तकण्ठेन प्रशंसां कृतवती। निर्णायकमंडलस्य सदस्यौ विद्यालयस्य संगीतशिक्षकः सुमन झा, अंजु अरोड़ा महोदयाः स्पर्धायाः निर्णयं प्रस्तुतवन्तौ। कार्यक्रमस्य संयोजिका रितु शर्मा, कावेरी महोदया च कार्यक्रमस्य सफलं संयोजनं कृतवत्यौ। संस्कृतविभागस्य वरिष्ठ शिक्षिका डॉ. ज्योत्स्ना श्रीवास्तवः अस्य कार्यक्रमस्य कार्ये अद्भुतं योगदानं कृतवती। देशभक्त्या ओतप्रोतस्य अस्य अद्भुतस्य कार्यक्रमस्य सर्वे प्रशंसां कृतवन्तः।